# Hakini Paranatha Stotram

# हाकिनी परनाथ स्तोत्रम्

## Document Information

Text title : Hakini Paranatha Stotram

File name : hAkinIparanAthastotram.itx

Category : devii, ShaTchakrashakti, devI, shiva

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# हाकिनी परनाथ स्तोत्रम्

अथ त्र्यशीतितमः पटलः
श्रीआनन्दभैरव उवाच
कथयस्व वरारोहे हाकिनीस्तोत्रमुत्तमम् ।
यस्य प्रपाठनाद् वाग्मी कृपायासे दयामयि ॥ ८३-१ ॥

श्रीआनन्दभैरवी उवाच
अत्यद्भुतं स्तोत्रवरं शृणु प्रभो सर्वेश्वरैर्भावितमादिगुह्यम् ।
यैः पठ्यते साधकचक्रनाथैस्तैरेव सिद्धैरतिधर्मविद्भिः ॥ ८३-२ ॥

ब्रह्माख्यां कामविद्यां नरहरिजननीं कामकूटस्वरूपाम् ।
हाकिन्याख्यां शम्भुजायां त्रिवधुमदनशां तारिणीं स्तौमि सिद्धाम् ।
हेरम्बानन्दविद्यां त्रिसमनदमनीं दीर्घकेशीं त्रिनेत्राम् ।
मन्दारारण्यमध्ये विकसितवदनाम्भोजहासप्रकाशाम् ॥ ८३-३ ॥

हिरण्यालङ्कारां त्रितयनयनां पट्टवसनां
महास्निग्धां शुद्धां कुलजनवरामिन्दुवदनाम् ।
सदा स्तौति श्रीदां भुवनकरुणां भावतरुणां
त्रिवेणीश्वेताभां वसमयतनुं भ्रूयुगदले ॥ ८३-४ ॥

महापद्मवनोद्रेकरम्यस्थाननिवासिनि ।
हाकिनि त्वां मुदा स्तौमि तद्धर्मकुरुपागताम् ॥ ८३-५ ॥

संसारार्णवतारिणीं नरहरिप्रेमाभिलाषोन्मनीं
भावारम्भविसर्जनैकनिलया मायां महासुन्दरीम् ।
भास्वत्कोटिसुरत्नसिंहवसतिं श्रीहाकिनीं द्राविणीं
स्तौमि क्षेत्रनिरीक्षणाय नियतां श्रीभारतीभाविताम् ॥ ८३-६ ॥

संस्कारश्रियमातनोति सहसा श्रीपार्वतीवल्लभे ।
नानारत्नकलापदर्शनमहाज्ञानं निदानं धनम् ।

सा साक्षादखिलेश्वरी परशिवानन्दैकबिन्दूज्ज्वला ।
मामादौ परिरक्षतु प्रियकरी संस्तौमि पीठान्तरे ॥ ८३-७॥

आकाशवेदलिङ्गे स्थितिपथिमिलिते भाति सा रक्तबर्हा
सा मां पात्वम्ब काली कुलपथभविका क्रोधनिःक्रोधकर्त्री ।
तस्याः श्रीपादपद्मत्रिभुवनभक्तकेशालिमाला
युक्तं सर्वेन्द्रपूज्यं निरवधिकमले द्वे दले स्तौमि विद्याम् ॥ ८३-८॥

साङ्गं द्वयं त्वत्प्रियं पदयुगं पत्रद्वयश्रेयसं
मञ्जीराद्भुतहारपादकमलं सम्भाव्य संस्तौम्यहम् ।
यद् ध्यात्वा हरिरीश्वरो गुणधरो जेता महारेःक्षणा-
दाशापाशविसर्जनैकनिलयं त्रैलोक्यसंरक्षकः ॥ ८३-९॥

या यात्रा व्रतवासिनी शशिमुखी छागादिमांसप्रिया ।
मामेकं परिपालय त्वमखिले त्वामेकरूपां शिवाम् ।
स्तौमीन्द्रावनतिप्रियां वाञ्मोक्षसहितानन्दैकहेतुप्रदाम् ॥ ८३-१०॥

शिवस्तुतिः

वरं परं नमाम्यहं गिरीन्द्ररूपगर्वहं
महेश्वरं परेश्वरं श्मशानबीजगह्वरम् ।
हिरण्यरत्नभूषणं शतेन्दुतेजसं तथा
शिवं तनुं पुनः परप्रभाप्रभाकरम् ॥ ८३-११॥

शरेण्यं वरेण्यं महाकामधन्यं
महादेवदेवं त्रिकालादिजन्यम् ।
श्मशानोग्रधूलिप्रियाङ्गानुलेपं
सदा स्तौमि संसारसारं निषेकम् ॥ ८३-१२॥

परशिवं मनसा सहसा निशि
प्रतिदिनं प्रणमाम्यहमादिमम् ।
शशिमुखीशतचन्द्रिकयान्वितं
भजनसाधक सत्फलदायकम् ॥ ८३-१३॥

परशिवचरणाब्जं हाकिनीशक्तिसेव्यं
त्रिभुवनसुखदानं ध्यानमात्रप्रकाशम् ।
अतिसुललितहस्ताम्भोजशोभां वहन्तं
भुवि निजकुलसारं स्तौमि योगीन्द्रगम्यम् ॥ ८३-१४॥

शोकश्शोकावलीलामति हि कलयति प्राणदेहाभिलाषं
हाकिन्याः प्राणनाथो भवशमनकरो हीरकास्त्रग्धरो वा ।
सोऽसौ भ्रूपद्मसारे रचयित कलिकां चित्तदीपस्य नित्यां
तस्य श्रीपादपद्मं गुणगणयजितं पूजितं स्तौमि भाले ॥ ८३-१५॥

मेरुशृङ्गनिकेतनैकवसनं गोलोकसंसेवितं
यज्ञानन्दनिषेवितं परशिवं योगीन्द्रचित्तस्थलम् ।
हालापाननिराकुलं पशुसमां सामोदनाचर्वणां
वन्दे नन्दिमहादिभैरववरैर्वन्द्यं जगत्कारणम् ॥ ८३-१६ ॥

मायापथच्छलकलाकपिलापतिस्त्वं
त्वं भूरविपतिरूपापतिरेकचक्रः ।
आपोऽनलत्वमखिले गगनप्रकाशा-
वायुस्थमावसिमुखं शरणं प्रपद्ये ॥ ८३-१७॥

वाञ्छाकल्पद्रुमतलगतं हेमसिंहासनस्थं
श्रीहाकिन्या रमणनिरतं कामकेलिप्रकाशम् ।
मायामोहं क्षयमतिसुखं विन्ध्यशैलाग्रसंस्थं
वन्दे नाथं हरपरशिवं रूपजालप्रकाशम् ॥ ८३-१८॥

फलश्रुतिकथनं

पठेद् यः स्तोत्रार्थं भवति स सुखी योगनिपुणः
क्षुधातृष्णानाशः श्रवणधृतयशोवासिसरसः ।
स योगीन्द्रो मासादतिशयपरानन्दघटकः
परीतः प्राणाख्ये रचयति सुधासिन्धुसुरसम् ॥ ८३-१९॥

एतत् स्तोत्रं पठेद्विद्वान् ध्यान न्यास समन्वितम् ।
शुक्लं रक्तं तथा पीतं नीलं कृष्णं विभाव्य च ॥ ८३-२०॥

कालचतुष्टये नित्यं पठित्वा सिद्धिमाप्नुयात् ।
आकाशे भूतले नाथ पाताले विघ्नकोटयः ॥ ८३-२१॥

योगिनां पठनादेव नश्यन्ति तत्क्षणादिह ।
सर्वत्र गामी स भवेदतिभाग्यफलोदयम् ॥ ८३-२२॥

महापापहरं स्तोत्रं हाकिनीहृदयोद्भवम् ।

सदाशिवप्रियं योगसिद्धिदं देवसेवितम् ॥ ८३-२३॥

सहस्रवारपाठेन पुरश्चर्याफलं लभेत् ।
पठित्वा स्तोत्रराजं तु श्मशाने निर्जने वने ॥ ८३-२४॥

अन्तरिक्षेऽथवा नाथ योगी स्यादमरो महान् ।
अस्य प्रपठनाद्वाग्मी ज्ञानवान् विजितेन्द्रियः ॥ ८३-२५॥

ध्यानात्मा सम्भवेत् क्षिप्रं परिवारगणैः सह ।
प्रातःकाले निशायां तु मध्याह्ने शेषकालके ॥ ८३-२६॥

प्रपठेत् स्तोत्रसारं तु भावात्मा साधकोत्तमः ।
अनायासेन भ्रूपद्मे स्थिरो भवति निश्चितम् ॥ ८३-२७॥

श्रीगुरोश्चरणाम्भोजं हृदये ध्याननिर्णयम् ।
यो ध्यात्वा पठ्यते स्तोत्रं स भवेत् कल्पपादपः ॥ ८३-२८॥

इदानीं कथये नाथ कवचं पटलान्तरे ॥ ८३-२९॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे
भैरवीभैरवसंवादे हाकिनीपरनाथस्तोत्रविन्यासो नाम
त्र्यशीतितमः पटलः ॥ ८३॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Hakini Paranatha Stotram*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*